"एष नैमित्तिकः प्रोक्तः प्रलयोयत्र विश्वसृक्। शेतेऽनन्तासने नित्यमात्मसात्कृत्य चात्मभूरिति" वचनं नैमित्तिक प्रलये मानम्। तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्व्वगोचरः सचैकजीववादे युगपदेव नानाजीववादे तु क्रमेण "सर्व्व एकीभवन्ति" इत्यादि श्रुतेः। तत्राद्यास्त्रयोऽपि लयाः कर्म्मोपरमनिमित्ताः तुरीयस्तु ज्ञानोदयनिमित्तोलयोऽज्ञानेन सहैवेति विशेषः"। अत्र तुरीयः आत्यन्तिकः तत्र विशेषमाह सि॰ शि॰ "वृद्धिर्विधेरह्नि भुवः समन्तात् स्याद्योजनं भूभवभूतपूर्वैः। ब्राह्मे लये योजनमात्रवृद्धेर्नाशो भुवः प्राकृतिकेऽखिलायाः। दिनेदिने यन्म्रियते हि भूतैर्दैनंदिनं तं प्रलयं वदन्ति। ब्राह्मं लयं ब्रह्मदिनान्तकाले भूतानि यद्ब्रह्मतनुं विशन्ति। ब्रह्मात्यये यत् प्रकृतिं प्रयान्ति सर्वाण्यतः प्राकृतिकं कृतीन्द्राः। लीनान्यतः कर्मपुटान्तरत्वात् पृथक् क्रियन्ते प्रकृतिविकारैः। ज्ञानाग्निदग्धाखिलपुण्यपापा मनः समादाय हरौ परेशे। यद्योगिनो यान्त्यनिवृत्तिमस्मादात्यन्तिकं चेति लयश्चतुर्धा"। "अत्र लयो भूतविनाशः। स तु साम्प्रतं प्रत्यहमुत्पद्यते स दैनंदिन उच्यते। यो ब्रह्मदिनान्ते चतुर्युगसहस्रावसाने लोकत्रयस्य संहारः स ब्राह्मो लय उच्यते। तत्राक्षीणपुण्यपापा एव लोकाः कालवशेन ब्रह्मशरीरं प्रविशन्ति। तत्र मुखं ब्राह्मणाः, बाह्वन्तरं क्षत्रियाः, ऊरुद्वयं वैश्याः, पादद्वयं शूद्राः। ततो निशावसाने पुनर्ब्रह्मणः सृष्टिं चिन्तयतो मुखादिस्थानेभ्यः कर्मपुटान्तरत्वाद्ब्राह्मणादयस्तत एव निःसरन्ति। तस्मिन् प्रलये भुवो योजनमात्रवृद्धेर्विलयो नाखिलायाः। अथ यदा ब्रह्मण आयुषोऽन्तस्तदा यः प्रलयः स महाप्रलय उच्यते। तत्र ब्रह्मा ब्रह्माण्डे, तत् पाञ्चभौतिके, भूर्जले, जलं तेजसि, तेजो वायौ, वायुराकाशे, आकाशमहंकारे, अहंकारो महत्तत्त्वे, महत्तत्त्वं प्रकृतौ। एवं सकलभुवनलोका अक्षीणपुण्यपापा एवाव्यक्तं प्रविशन्ति। यदा भगवान् सिसृक्षुः प्रकृतिपुरुषौ क्षोभयति। तदा तानि भूतानि कर्म्मपुटान्तरत्वात् प्रकृतेः स्वत एव निःसरन्ति। यथाह श्रीविष्णुपुराणे पराशरो जगदुत्पत्तिकारणम्। "प्रधानकारणीभूता यतो वै सृज्यशक्तय"इति सृज्यशक्तयस्तत्कर्माणि। तान्येव सृष्टौ मुख्यं कारणम्। इतराणि निमित्तकारणानि। अन्यैरप्युक्तम्। "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि"। "नह्यात्मनां भवति कर्मफलोपभोगः कायाद्विनेत्यादि"। अस्मिन् प्रलयेऽखिलाया भुवो नाश इत्यर्थः। तथा "ज्ञानाग्निदग्धाखिलपुण्यपापा योगिनो विषयेभ्यो मनः समादाय समाहृत्य तद्धरौ समाहितं कृत्वा यान्ति देहं त्यजन्ति। अनिवृत्तिं यान्ति। स आत्यन्तिको लय इति" प्रमिता॰।

**आत्ययिक** त्रि॰ अत्ययः नाशः प्रयोजनमस्य ठक्। नाशप्रयोजनके कर्मणि "अशिश्रवन्नात्ययिकं समेत्य" भट्टिः। "एकाकिनश्चात्ययिके कार्य्ये प्राप्ते भयप्रदे" मनुः। "कच्चिदात्ययिकं श्रुत्वा तदर्थमनुचिन्त्य च। प्रियाण्यनुभवन् शेषे न त्वमन्तःपुरे नृप!" भा॰स॰प॰५अ॰।

**आत्रेय** पु॰ अत्रेरपत्यम् ढक्। अत्रिमुनेरपत्ये तस्यापत्यानि बहूनि तेषु मन्वन्तरभेदे केचित् सप्तर्षिमध्यपातिनः यथा ५मन्वन्तरे "वेदबाहुर्यदुध्रश्च मुनिर्वेदशिरास्तथा। हिरण्यरोमा पर्जन्य ऊर्द्ध्वबाहुश्च सोमजः। सत्यनेत्रस्तथात्रेय एते सप्तर्षयोऽन्तरे"। ८मन्वन्तरे। "रामो व्यासस्तथात्रेयो दीप्तिमानिति विश्रुतः भारद्वाजस्तथाद्रौणिरश्वत्थामा महाद्युतिः। गौतमस्यात्मजश्चैव शरद्वान्नाम गौतमः। कौशिको दानवश्चैव रुरुः काश्यप एव च। एते सप्त महात्मानो भविष्या मुनिसत्तमाः। ब्रह्मणः सदृशाश्चेति धन्याः सप्तर्षयः स्मृताः"। ९ मन्वन्तरे। "मेधातिथिस्तु पौलस्त्यो वसुः काश्यप एव च। ज्योतिष्मान् भार्गवश्चैव द्युतिमानङ्गिरास्तथा। सवनश्चैव वाशिष्ठ आत्रेयोहव्यवाहनः। पौलहः सत्य इत्येते मुनयो रौहितेऽन्तरे"। १०मन्वन्तरे "हविष्मान् पौलहश्चैव सुकृतिश्चैव भार्गवः। आपोमूर्त्तिस्तथाऽत्रेयो वाशिष्ठश्चाष्टकः स्मृतः। पौलस्त्यः प्रमतिश्चैव नभोगश्चैव काश्यपः। अङ्गिरा नभसः सत्यः सप्तैव परमर्षयः" ११ मन्वन्तरे। "हविष्मान् काश्यपश्चापि हविष्मान् यश्च भार्गवः। तरुणश्च तथात्रेयो वासिष्ठस्तनयस्तथा। अङ्गिराश्चोदधिष्णश्च पौलस्त्योनिश्चरस्तथा। पौलहश्चाग्नितेजाश्च भाव्याः सप्त महर्षयः" १२ मन्वन्तरे। "द्युतिर्वसिष्ठपुत्रश्च आत्रेयः सुतपास्तथा। अङ्गिरास्तमसोमूर्त्तिस्तपस्वी काश्यपस्तथा। पयोऽशनश्च पौलस्त्यः पौलहश्च तपोरविः। भार्गवः सप्तमस्तेषां विज्ञेयश्च ततोधृतिः"। १३ मन्वन्तरे। अङ्गिराश्चैव धृतिमान् पौलस्त्यो हव्यपस्तु यः। पौलहस्तत्त्वदर्शी च भार्गवश्च निरुत्सुकः। निष्प्रकम्पस्तथाऽऽत्रेयो निर्मोहः काश्यपस्तथा। सुतपाश्चैव वाशिष्ठः सप्तैते तु महर्षयः" १४ मन्वन्तरे। अग्नीध्रः